# श्री सुरसरस्वती सभा (रि) शृङ्गेरि

Aug - 2007 (1)

## तृतीया परीक्षा

## प्रथमपत्रिका

दिनाङ्कः - २.१.२००७ | अङ्काः - १००

पूर्वाह्णे - १०.०० तः १.०० पर्यन्तम् | समयः - घण्टात्रयम्

1. एकंवाक्येन संस्कृतभाषया उत्तरं लिखत (अष्टानामेव) 8

१. सर्वे देवाः कं स्तोतुं समुपचक्रिरे?

२. शुकशावकयोः नाम किम्?

३. कंनकलतायाः पुत्री का?

४. अचक्षुषां चक्षुः कः?

५. कीदृशौ सुतौ वरम्?

६. एकलव्यः कः?

७. कपोतराजस्य नाम किम्?

८. कालटिग्रामः कुत्रास्ति?

९. कृतमुपकारं के न विस्मरन्ति?

१०. सीता मारुतेः करे किं दत्तवती?

2. द्वित्रैः वाक्यैः संस्कृतभाषाया उत्तरं लिखत (पञ्चानामेव) 10

१. शङ्कराचार्यः कदा अवातरत्?

२. व्याधः कथमासीत्?

३. नय शास्त्रकर्तारः के?

४. विष्णुशर्मणः प्रतिज्ञा का?

५. कौशिकः कीदृशः द्विजः आसीत्?

६. मल्लः परिकरं बध्वा राजानं किमुवाच?



पश्चादनुवर्तते

3. संस्कृतभाषाया उत्तरं लिखत। (त्रयाणामेव) 9

१. कालिदासेन पूरिता समस्या का?

२. गृहिणी द्विजं किमवदत्?

३. मल्लस्य सामर्थ्यं विशदयत।

४. नव गोप्यानि कानि?

4. आंग्ल भाषाया कन्नडभाषाया वा उत्तरं लिखत (त्रयाणामेव) 12

१. पञ्चतन्त्रस्य रचयिता कः? तत् किमर्थं तेन रचितम्?

२. शङ्कराचार्यस्य शिष्याः के? तैः कुत्र मठाः संस्थापिताः ? कुतः?

३. 'ब्राह्मणः सर्पश्च' अस्य पाठस्य सारांशं स्ववाक्यैः लिखत।

४. वागाडम्बरवान् न विश्वसनीयः समर्थयत।

5. चतुर्णां ससन्दर्भं स्वोत्तरभाषाया विवृणुत। 12

१. यदि पूरिता समस्या पठ्यताम्।

२. नीतिविदा पुरुषेण स्वस्यायुर्नकथनीयम्।

३. अतिथिसत्कारः श्रेयस्करः।

४. नहि किञ्चित् गुरवे अदेयम्।

५. भोः विप्र ! नाहं बलाका।

6. अन्वयानुसारमर्थं कन्नड भाषाया आंग्लभाषाया वा लिखत (द्वयोः) 4

१. षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता॥

२. वागाडम्बरवान् लोके न किञ्चित्कर्तुमर्हति।
गर्जद्धना न वर्षन्ति न गर्जन्ति घना घनाः ॥

३. निन्दन्तु नीति निपुणाः यदि वा स्तुवन्तु लक्ष्मीस्समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात् पथः प्रविचलन्ति पदं न धीराः॥



पश्चादनुवर्तते

**7.** श्लोकद्वयं पूरयत। **4**

१. सुखार्थी वा .......................... सुखम्॥

२. प्रत्यहं प्रत्यवेक्षेत .................... सत्पुरुषैरिति ॥

३. शान्ताकारं .......................... लोकैकनाथम्॥

**8.** कन्नड भाषया आंग्लभाषया वा अनुवादं कुरुत। **5**

कौशिकः भैक्ष्याय कश्चित् ग्राममगच्छत्। तत्र कस्याश्चित् गृहिण्याः सदनमेत्य ' भवति, भिक्षां देहि' इत्ययाचत। गृहिणी ब्राह्मणं दृष्ट्वा 'तिष्ठे ' त्युक्तवती। एतस्मिन्नन्तरे तस्याः भर्ता क्षुधासंपीडितः सहसा गृहं प्रविष्टः। सा साध्वी पतिमागतं दृष्ट्वा ब्राह्मणं विहाय पतिसेवानिरता अभवत्।

**9.** रिक्तस्थानं पूरयत। **3**

१. राजा बन्धुः ................ ।

२. आसीत् गोदावरी तीरे विशालः .................... ।

३. आसीत् द्रोणो नाम प्रथितः ....................... ।

**10.** पर्यायपदानि लिखत (त्रयाणामेव) **3**

१. वायसः २. देवाः ३. तोयम् ४. करी

**11.** विरुद्धार्थकपदानि लिखत (त्रयाणामेव) **3**

१. रात्रिः २. पापभाक् ३. मित्रम् ४. दुर्जनः

**12.** वाक्यं रचयत। (त्रयाणामेव) **3**

१. सर्गः २. आसीत् ३. अन्तरा ४. प्रणम्य

**13.** सर्वपुरुषवचनेषु लिखत। (एकस्य) **3**

१. वेत्ति २. अब्रवीत् ३. कारयामास



पश्चादनुवर्तते

**14.** सन्धिं विभज्य नाम लिखत। (त्रयाणामेव) 3

१. षड्दोषाः २. नीचैरपि ३. मनश्शान्तिः ४. तावेव

**15.** लोकोक्तिं पूरयित्वा आंग्ल भाषाया कन्नड भाषाया वा अर्थं विवृणुत। 4

१. उद्योगिनं ........................... लक्ष्मीः।

२. प्रक्षालनाद्धिपङ्कस्य ................. वरम्।

**16.** व्याकरणविशेषं लिखत। (द्वयोः) 4

१. नमस्ते २. भोजनात् प्राक् ३. कपोतराजः

**17.** प्रयोगपरिवर्तनं कुरुत। 2

१. सः पूजां न कृतवान् २. मत्पुत्रेण स्वकर्मणः फलमनुभूतम्।

**18.** वाक्यदोषं परिहरत। 3

१. द्रोणस्य सह अर्जुनः वसति २. रामः रावणस्य क्रुध्यति ३. भवान् पत्रं लिख।

**19.** कर्तु - कर्म - क्रिया पदानि सूचयत। 2

१. रामः गृहे एव पाठं पठति। २. कृष्णः कंसं हत्वा तुष्यति।

**20.** समूहेतर पदं लिखत। 3

१. शनैः रामैः गजैः हरिभिः।

२. प्रहरति आहरति हरति संहरति।

३. गतवान् भीतवान् हनूमान् पठितवान्।

# श्री सुरसरस्वती सभा (रि.) शृङ्गेरि

## तृतीया परीक्षा

Aug – 2006 (2)

### द्वितीयपत्रिका

अङ्काः -५०

दिनाङ्कः - ३-९-२००६

अपराह्ने - १.३० तः ३.०० पर्यन्तम् समयः - सार्धैकहोरा

1 दशभिर्वाक्यैः संस्कृतभाषया प्रबन्धमेकं लिखत । 5

१. कावेरीनदी २. उद्यानम् ३. वार्तापत्रिकाः

2 संस्कृतभाषया पत्रमेकं लिखत । 5

१. अनारोग्यनिमित्तं दिनत्रयं विरामं प्रार्थयन् वर्गोपाध्यायं प्रति पत्रम् ।
२. उद्योगार्थमभ्यर्थनापत्रम् ।

3 द्वयोः लक्षणं सोदाहरणं आङ्ग्लभाषया कर्णाटकभाषया वा लिखत । 6

१. उपसर्गाः २. अव्ययम् ३. कर्मणि प्रयोगः

4 सर्वेषु पुरुषवचनेषु लिखत । (द्वयोः) 6

१. वन्दताम् २. अवदत् ३. वन्दिष्यते

5 एकस्य रूपाणि सर्वविभक्तिवचनेषु लिखत । 4

१. राजन् २. अस्मद् ३. पितृ

6 वाक्यदोषान् परिहरत । 3

१. वृश्चिकस्य भयं भवति ।
२. महाराजा नगरं गच्छति ।
३. वनस्य निकषा देवालयः अस्ति ।

7 प्रयोगपरिवर्तनं कुरुत । 3

१. बालेन फलं खाद्यते ।
२. छात्राः शालां गच्छन्ति ।
३. कालिदासेन रघुवंशकाव्यं लिखितम् ।



पश्चादनुवर्तते

8 कृदन्तपदानि चित्वा नामनिर्देशं कुरुत । 3

१. सेवकः कार्यं कुर्वन् अस्ति ।
२. शोभमानं मन्दिरं पश्य ।
३. अहं गुरुं प्रणम्य पठामि ।

9 अन्यलिङ्गरूपं लिखत । (त्रयाणाम्) 3

१. राजा २. व्याघ्री ३. सेवकः ४. विद्वान्

10 एकं वाक्यं कर्णाटकभाषया वा आङ्ग्लभाषया वा विवृणुत । 2

१. यथा राजा तथा प्रजाः ।
२. अल्पविद्यो महागर्वी ।

11 मातृभाषायाम् अनुवादं कुरुत । 5

१. दशरथस्य चत्वारः पुत्राः अभवन् ।
२. गोविन्दः आलस्यात् न पठति ।
३. देवः कुत्र नास्तीति कृपया वदतु ।
४. तडागस्य जले जनाः निमज्जन्ति ।
५. नृपोऽसौ शत्रून् विजित्य राजधानीं प्राविशत् ।

12 संस्कृतभाषया अनुवादं कुरुत । 5

1) ಗೋದಾವರಿಯ ತೀರದಲ್ಲಿ ಒಂದು ಆಲದಮರವಿತ್ತು.
There was a Banyan tree on the bank of Godavari.
2) ಆದ್ದರಿಂದ ನಾವು ಮೂರ್ಖರಿಗೆ ಉಪದೇಶ ಮಾಡಬಾರದು.
So, we should not advise the foolish.
3) ನಾನು ಬೆಳಿಗ್ಗೆ ಎದ್ದು ದೇವರನ್ನು ವಂದಿಸುತ್ತೇನೆ.
I salute the God in the morning after getting up.
4) ದೇವರು ಭಕ್ತನಿಗೆ ವರವನ್ನು ಕೊಟ್ಟನು.
The God gave a boon to the Devotees
5) ಎಲ್ಲ ಜನರೂ ಸಂತೋಷದಿಂದಿರಲಿ.
Let all the people be happy.

*****